# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-1)(New&Old)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – साहित्यम् | **कोड –C.C.1.1.1** | समयः- 11:30 तः 2:30पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – साहित्यदर्पणः (१-२ परिच्छेदौ) | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ निम्नाङ्कितेषु द्वयोः ससन्दर्भं व्याख्या कार्या।** १०

१ शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी।
अपहृत्य तमः सन्ततमर्थानखिलान्प्रकाशयतु॥

२ नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥

३ कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥

**प्रश्न २ निम्नलिखितयोः एकस्य सविस्तरम् उत्तरं लेख्यम्।** १०

१ विश्वनाथस्य जीवनपरिचयं सप्रमाणं लिखत।

२ विश्वनाथस्य काव्यलक्षणं सोदाहरणं प्रतिपाद्यताम्।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या।** १०

१ वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः।
अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मत:॥

२ मुख्यार्थबाधे तद्युक्तो यथान्योर्थ: प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥

३ सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।
सादृश्यात्तु मता गौण्यस्तेन षोडशभेदिताः॥

**प्रश्न ४ निम्नलिखितयोः एकस्य समीक्षात्मकम् उत्तरं लिखत।** **१०**

१ साहित्यिकाः कुत्र शक्तिग्रहं मन्यन्ते? विविच्यताम्।

२ 'गौर्वाहिकः' इत्यत्र का नाम लक्षणा? विविच्यताम्।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या।** **१०**

१ अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया॥

२ शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता॥

३ तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे॥

**प्रश्न ६ कस्यापेकस्य निबन्धात्मकम् उत्तरं लिखत।** **१०**

१ का नाम व्यञ्जना? कुत्रोपयुज्यते? कतिविधा च सा ? विविच्यताम्।

२ शाब्दीव्यञ्जनायाः निरूपणं विशदेन कुरुत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानां लघूत्तराणि लिखत।** **१०**

१ प्रथमपरिच्छेदस्य नाम किम् ?

२ साहित्यदर्पणस्य कर्तुः नाम किम् ?

३ रसशब्दस्य का व्युत्पत्तिः ?

४ काव्यतो धर्मप्राप्तिः कथं भवति ?

५ साहित्यदर्पणे कति परिच्छेदाः सन्ति ?

६ पदोच्चयस्य योग्यता का ?

७ को नाम गुणः ?

८ महावाक्यं किम् ?

९ गंगायां घोषः इति वाक्ये लक्षणायाः किं प्रयोजनं वर्तते ?

१० रुढौ उपादानलक्षणायाः किमुदाहरणम् ?

११ को नाम लक्ष्यार्थः ?

१२ का नामाभिधा शक्तिः ?

१३ व्यञ्जना कतिविधा ?

१४ द्वितीयपरिच्छेदस्य नाम किम् ?

१५ द्वितीयपरिच्छेदे कति कारिकाः सन्ति ?